महेन्द्रवारुणी । रुद्रजटा । महाज्योतिष्मती । महिषवल्ली । गुञ्जा । शालपर्णी । ब्राह्मी । शटी मल्लिका । इति राजनिर्घण्टः ॥

सौम्याः, स्त्री, ( सोमो देवता यासाम् । सोम + ण्य । ) इल्वलाः । तास्तु मृगशिरोनक्षत्रशिरःस्थाः पञ्च ताराः । इति विश्वहेमचन्द्रौ ॥

सौरः,पुं,(सूरस्य सूर्य्यस्यायमिति । सूर + अण् । शनैश्चरः । इत्यमरटीकायां भरतः । १ । ३ । २६ ॥ (यथा, हरिवंशे द्वितीयायाम् । १० । ४ ।
"बहुलास्ते पौधान्ते सौरेऽभ्युपजीविन-समूपाय ॥")
तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ सूर्य्यैकराशिभोगावच्छिन्नमासादिः । यथा, विष्णुधर्म्मोत्तरम् ।
"आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः॥
विवाहादिकर्म्मसु सौरमासस्यात्तेषु कर्त्तव्यः । यथा, पितामहः ।
"आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"
विवाहादावित्यत्रादिपदं यात्राग्रहचारपरम् । यत्कर्म्म सूर्य्यभोग्यराश्युल्लेखेन विहितं यच्च विशेषोदगयनादिविहितं तत्परञ्च । अयनस्य सौरमासघटितत्वेन वक्ष्यमाणत्वात् । तच्च चूडोपनयनादि । विष्णुधर्म्मोत्तरम् ।
"अध्यायनञ्च ग्रहचारकर्म्म
सौरेण मानेन सदाध्यवस्येत् ।
सत्रास्यपास्यान्यथ सावनेन
लोकस्य यत् स्याद्व्यवहारकर्म्म ॥"
अध्यायनं अध्वगमनं यात्रेति यावत् । इति ज्योतिस्तत्त्वम् ॥ * ॥ सूर्य्योपासकः । ( यथा, महानिर्व्वाणतन्त्रे । ३ । १४२ ।
"शाक्ताः शैवा वैष्णवाश्च सौरा गाणपतास्तथा ।
विप्रा विप्रेतराश्चैव सर्व्वेऽप्यत्राधिकारिणः ॥")
गुरुविशेषः । यथा,—
"गौडाः शाल्वोद्भवाः सौरा मागधाः केरलास्तथा ।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः ॥"
इति तन्त्रसारे १ परिच्छेदः ॥
( उपपुराणविशेषे, क्ली । यथा, देवीभागवते । १ । ३ । १५ ।
"सौरं पराशरप्रोक्तमादित्यञ्चातिविस्तरम् ॥"
सूर्य्यसम्बन्धिनि, त्रि । यथा,—
"शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च ।
साधनानि च सौराणि चान्यानि यानि कानि च
श्रुतानि तानि देवेश तद्वक्त्राब्जिःसृतानि च ॥"
इति तन्त्रसारे ३ परिच्छेदः ॥ * ॥
यथा च हरिवंशे भविष्यपर्व्वणि । ४९ । ५२ ।
"यदा सौरं वपुरिति स्मर्त्ता स्वां जगतीपते ।
तदा तद्भावनायोगात् सूर्य्य एव विराजसे ॥")

सौरजः, पुं, ( सौरात् तेजसः जायते इति । जन + डः ।)तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥

सौरणाति, त्रि ॥

सौरदिवसः, पुं, (सौरो दिवसः ।) सूर्य्यसम्बन्धिदिनम् । तत्तु रविभुक्तांशाधिकषष्टिदण्डैर्भवति । यथा,"सावनं दण्डाः षष्टिरेवः स्वलग्नस्वगुणांशाख्यास्तदैनं भवेत् ॥" इति मलमासतत्त्वम् ॥
"त्रिंशता सौरदिवसैः सावनः परिकीर्त्तितः ॥"
इति शब्दरत्नावली ॥

सौरनक्तं, क्ली, व्रतविशेषः । यथा,—
"हस्तयुक्ते अर्कदिने सौरनक्तं समाचरेत् ।
स्नात्वा चार्कं समभ्यर्च्य नीरोगी चिरजीवति॥
आत्मनो द्विगुणच्छायं यदा सन्तिष्ठते रविः ।
सौरनक्तं विजानीयात् नक्तञ्च निशिभोजनम् ॥
इति नारसिंहे ६४ अध्यायः ॥

सौरभं, क्ली, ( सौरभमस्यास्तीति । अच् । ) कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ बोलम् । इति राजनिर्घण्टः ॥ सुगन्धः । सुरभेर्भाव इत्यर्थे ष्यञ्(अण्) प्रत्ययेन निष्पन्नम् ॥ (यथा, नैषधे । २ । ९२ ।
"समयेणमदैर्यदापणे
तुलयन् सौरभलोभनिश्चलम् ।
पणिता न जनारवैरवै-
दपि गुञ्जन्तमलिं मलीमसम् ॥"
तद्विशिष्टे, त्रि । यथा, भागवते । ८ । २ । ८ ।
"सरित्सरोभिरच्छोदैः पुलिनैर्म्मणिबालुकैः ।
देवस्त्रीमज्जनामोदसौरभाम्बुनिलैर्युतः ॥" )

सौरभेयः,पुं,(सुरभेरपत्यमिति । सुरभि + ढक् ।) वृषः । इत्यमरः । २ । ९ । ६० ॥ (यथा, भागवते । १ । १७ । ९ ।
"मा सौरभेयात्र शुचो व्येतु ते वृषलात् भयम्॥"
सुरभिसम्बन्धिनि, त्रि ॥

सौरभेयी, स्त्री, ( सुरभेरपत्यं स्त्री । सुरभि + ढक् । ङीप् ।) गौः । इत्यमरः । २ । ९ । ॥३॥ ( यथा, रघुः । २ । ३ ।
"निवर्त्त्य राजा दयितां दयालु-
स्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां
जुगोप गोरूपधरामिवोर्व्वीम् ॥"
अप्सरोविशेषः । यथा, महाभारते ।२।१०।११।
"विश्वाची सहजन्या च प्रम्लोचा उर्व्वशी इरा वर्गा च सौरभेयी च समीची बुद्बुदा लता ॥")

सौरभ्यं, क्ली, ( सुरभेर्भावः । सुरभि + ष्यञ् । ) मनोज्ञत्वम् । सौगन्ध्यम् । ( यथा, आर्य्यासप्तशत्याम् । २१३ ।
"गुणविस्तृता सखि तिष्ठसि तथैव देहेन किन्तु हृदयं ते ।
हृतमसुना मालायाः समीरणेनेव सौरभ्यम्॥")
गुणगौरवम् । इति मेदिनी ॥

सौरभ्यः, पुं, ( सौरभ्यं गुणगौरवमस्यास्तीति । अच् । ) कुबेरः । इति शब्दरत्नावली ॥

सौरमासः, पुं, (सौरो मासः । ) सूर्य्यैकराशिभोगावच्छिन्नकालः । यथा, ब्रह्मसिद्धान्ते ।
"एकराशौ रविर्यावत्कालं मासः स भास्करः॥"
इति मलमासतत्त्वम् ॥
अपि च ।
"अथ षड्भिः सौरमासैरयनं परिकीर्त्तितम् ॥"
इति शब्दरत्नावली ॥
अस्यान्यद्विवरणं सौरशब्दे द्रष्टव्यम् ॥

सौरसंवत्सरः, पुं, ( सौरः संवत्सरः । ) सूर्य्यस्य द्वादशराशिभोगावच्छिन्नकालः । यथा,—
"सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ।
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ॥"
अपि च ।
"सौरेनाब्दस्तु मानेन यदा भवति भार्गव ।
सावनेन तथा मासि दिनषट्कं प्रपूर्य्यते ॥"
इति मलमासतत्त्वम् ॥

सौरसेयः,पुं,स्कन्दः । इति शब्दमाला ॥ सुरसाया अपत्यञ्च ॥ ( सुरसमर्हतीति । सुरस + "वुञ्छण्कठजिति ।" ४ । २ । ८० । इति सख्यादित्वात् ढञ् । सुरसार्हे, त्रि ॥ )

सौरसैन्धवः, त्रि, (सुरसिन्धोरयम् । सुरसिन्धु + अण् । ) गङ्गासम्बन्धीयः । स च भीष्मादिः । ( सौरः सूर्य्यसम्बन्धी सैन्धवः घोटकः । )सूर्य्यघोटके, पुं ॥

सौराष्ट्रः,पुं,(सुराष्ट्र एव । अण् ।) देशविशेषः । इति जटाधरः॥ सुरट् इति भाषा ॥ कुन्दुरुकः। इति राजनिर्घण्टः ॥ कांस्ये, क्ली । इति केचित्॥

सौराष्ट्रकं, क्ली, ( सुराष्ट्रे भवम् । अण् । ततः कन् । ) पञ्चलोहम् । इति हेमचन्द्रः ॥

सौराष्ट्रा, स्त्री, (सुराष्ट्रे भवा । अण् । ) तुवरी । इति राजनिर्घण्टः ॥

सौराष्ट्रिकं, क्ली, ( सुराष्ट्रे देशे भवम् । अध्यात्मादित्वात् ठञ् ।) विषभेदः । इति शब्दरत्नावली भरतश्च ॥ ( अस्य पर्य्यायो लक्षणञ्च । यथा,—
"विषन्तु गरलं क्ष्वेडस्तस्य भेदानुदाहरे ।
वत्सनाभः स हारिद्रः सक्तुकश्च प्रदीपनः ॥
सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्त्रो विषभेदा अमी नव ॥"
"सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
सौराष्ट्रदेशसम्बन्धिनि, त्रि ॥

सौराष्ट्री, स्त्री, (सुराष्ट्रे भवा । अण् । ङीप् । ) सौराष्ट्रदेशीयसुगन्धिमृत्तिका । तत्पर्य्यायः । पार्व्वती २ काशी ३ मृत्स्ना ४ काची ५ पर्पटी ६ । इति रत्नमाला ॥ कालिका ७ सती ८ । इति हेमचन्द्रः ॥ अस्या गुणाः । कफपित्तवीसर्पव्रणनाशित्वम् । इति राजवल्लभः॥ राजनिर्घण्टोक्तगुणपर्य्यायौ तुवरीशब्दे द्रष्टव्यौ ॥

सौरिः, पुं, (सुरस्यापत्यमिति । सूर + इञ् । ) शनिः । इत्यमरः । १ । ३ । २६ ॥ यथा, बृहत्संहितायाम् । १०४ । १४७ ।
"कृष्णाद्रव्ये सौरिः सौम्यो मरिचजतिलक-कुसुमैर्गुरुः परिपीतकैः ॥")
असनवृक्षः । आदित्यभक्ता । इति राजनिर्घण्टः ॥